"वापीजलानां मणिमेखलानां
शशाङ्कभासां प्रमदाजनानां ।
चूतद्रुमाणां कुसुमान्वितानां
ददाति सौरभ्यमयं वसन्तः" ॥

फलकुसुमविशेषाणां द्रव्यान्तरसुलभत्वादिसूचकत्वं दर्शितं यथा वृहत्संहितायां २९ अध्याये ।
"फलकुसुमसम्प्रवृद्धिं वनस्पतीनां विलोक्य विज्ञेयम् । सुलभत्वं द्रव्याणां निष्पत्तिश्चापि शस्यानाम्" ॥
केन कस्य वृद्धिर्ज्ञेया तदाह ।
"शालेन कलमशालीरक्ताशोकेन रक्तशालिश्च ।
पाण्डूकः क्षीरिकया नीलाशोकेन सूकरकः ॥
न्यग्रोधेन तु यवकस्तिन्दुकवृद्ध्या च षष्टिको भवति ।
अश्वत्थेन ज्ञेया निष्पत्तिः सर्व्वशस्यानाम् ॥
जम्बूभिस्तिलमाषाः शिरीषवृद्ध्या च कङ्गुनिष्पत्तिः ।
गोधूमाश्च मधूकैर्यववृद्धिः सप्तपर्णेन ॥
अतिमुक्तककुन्दाभ्यां कर्पासं सर्षपान् वदेदसनैः ।
बदरीभिश्च कुलत्थांश्चिरविल्वेनादिशेन्मुद्गान् ॥
अतसीवेतसपुष्पैः पलाशकुसुमैश्च कोद्रवा ज्ञेयाः ।
तिलकेन शङ्खमौक्तिकरजतान्यथ चेङ्गुदेन शणाः ॥
करिणश्च हस्तिकर्णैरादेश्या वाजिनोऽश्वकर्णेन ।
गावश्च पाटलाभिः कदलीभिरजाविकं भवति ॥
चम्पककुसुमैः कनकं विद्रुमसम्पच्च बन्धुजीवेन ।
कुरुवकवृद्ध्या वज्रं वैदूर्य्यं नन्दिकावर्त्तैः ॥
विद्याच्च सिन्धुवारेण मौक्तिकं कुङ्कुमं कुसुम्भेन ।
रक्तोत्पलेन राजा मन्त्री नीलोत्पलेनोक्तः ॥
श्रेष्ठी सुवर्णपुष्पैः पद्मैर्विप्राः पुरोहिताः कुमुदैः ।
सौगन्धिकेन बलपतिरर्केण हिरण्यपरिवृद्धिः ॥
आम्रैः क्षेमं भल्लातकैर्भयं पीलुभिस्तथारोग्यम् ।
खदिरशमीभ्यां दुर्भिक्षमर्ज्जुनैः शोभना वृष्टिः ॥
पिचुमर्द्दनागकुसुमैः सुभिक्षमथ मारुतः कपित्थेन ।
निचुलेनावृष्टिभयं व्याधिभयं भवति कुटजेन ॥
दूर्व्वाकुशकुसुमाभ्यां भिक्षुर्वक्षिश्च कोविदारेण ।
श्यामालताभिवृद्ध्या बन्धक्यो वृद्धिमायान्ति" ॥)

फलम् । स्त्रीरजः । (यथा, ज्योतिषशास्त्रे ।
"यदा नार्य्याः पितुर्गेहे कुसुमस्तनसम्भवः" ॥)
नेत्ररोगविशेषः । इति मेदिनी ॥

कुसुमपुरं, क्ली, (कुसुमाख्यं पुरम् ।) पुरविशेषः । पाटना इति ख्यातम् । तत्पर्य्यायः । पाटलिपुत्रम् २ । इति हेमचन्द्रः ॥ (यथा, मुद्राराक्षसे २याङ्के । "सखे ! विराधगुप्त ! वर्णयेदानीं कुसुमपुरवृत्तान्तशेषं अपि क्षमन्ते कुसुमपुरनिवासिनोऽस्मदुपजापं चन्द्रगुप्तप्रकृतयः" ॥)

कुसुममध्यं, क्ली, (कुसुमं मध्ये अभ्यन्तरे यस्य ।) वृक्षविशेषः । इति शब्दचन्द्रिका । चालिता गाछ इति भाषा ॥

कुसुमाञ्जनं, क्ली, (कुसुमाकारमञ्जनं शाकपार्थिवादिवत् समासः ।) कुसुमाकाररीतिमलसम्भवमञ्जनम् । तत्पर्य्यायः । पौष्पकम् २ रीतिपुष्पम् ३ पुष्पकेतु ४ । इत्यमरः । २ । ९ । १०३ । राजनिर्घण्टोक्तगुणपर्य्यायौ पुष्पाञ्जनशब्दे द्रष्टव्यौ ॥

कुसुमात्मकं, क्ली, (कुसुममेवात्मा स्वरूपं यस्य । कप् ।) कुङ्कुमम् । इति हारावली ॥

कुसुमाधिपः, पुं, (कुसुमेषु कुसुमप्रधानवृक्षेषु अधिपः श्रेष्ठः ।) चम्पकवृक्षः । इति शब्दरत्नावली ॥ (चम्पकशब्देऽस्य विवृतिर्ज्ञातव्या ॥)

कुसुमाधिराट्, [ज्] पुं, (कुसुमेषु कुसुमप्रधानवृक्षेषु अधिराजते दूरव्यापिसुगन्धित्वात् । अधि + राज् + क्विप् ।) चम्पकवृक्षः । इति त्रिकाण्डशेषः ॥

कुसुमायुधः, पुं, (कुसुमानि आयुधानि अस्त्राणि अस्य ।) कामदेवः । इति शब्दरत्नावली ॥ (यथा, शाकुन्तले ३याङ्के ।
"भगवन् मन्मथ ! कुतस्ते कुसुमायुधस्य सतस्तैक्ष्ण्यमेतत्" ॥ तथा, कुमारे च । ४ । ४० ।
"कुसुमायुधपत्नि ! दुर्लभ-
स्तव भर्त्ता न चिराद्भविष्यति" ॥ इति ॥)

कुसुमालः, पुं, (कुसुमवत् लोभनीयं द्रव्यादिकं आलाति सम्यक् अगोचरेणैव गृह्णाति । आ + ला + कः ।) चौरः । इति हारावली ॥

कुसुमासवं, क्ली, (कुसुमानां तद्रसानां आसवम् मद्यम् ।) मधु । इति राजनिर्घण्टः ॥

कुसुमेषुः, पुं, (कुसुमानि इषवो बाणा यस्य ।) कामदेवः । इत्यमरः । १ । १ । २७ ॥ (यथा, माघे । ८ । ७० ।
"स्वच्छाम्भःस्नपनविधौतमङ्गमोष्ठ-
स्ताम्बूलद्युतिविशदो विलासिनीनाम् ।
वासश्च प्रतनु विविक्तमस्त्वितीया-
नाकल्पो यदि कुसुमेषुणा न शून्यः" ॥)

कुसुम्भं, क्ली, (कौ पृथिव्यां सुम्भति शोभते दीप्तिं प्राप्नोतीत्यर्थः । कु + सुभि + अच् इदित्वात् नुम् ।) स्वर्णम् । इति मेदिनी ॥ पुष्पविशेषः । कुसुमफुल इति भाषा ॥ (यथा, ऋतुसंहारे वसन्तवर्णने ६ ।
"कुसुम्भरागारुणितैर्दुकूलै-
र्नितम्बविम्बानि विलासिनीनाम् ।
तन्वंशुकैः कुङ्कुमरागगौरै-
रलङ्क्रियन्ते स्तनमण्डलानि" ॥)
तत्पर्य्यायः । कमलोत्तमम् २ वह्निशिखम् ३ महारजनम् ४ । इत्यमरः । २ । ९ । १०६ ॥ पावकम् ५ पीतम् ६ पद्मोत्तरम् ७ रक्तम् ८ लोहितम् ९ वस्त्ररञ्जनम् १० अग्निशिखम् ११ । अस्य शाकगुणाः । मधुरत्वम् । कटुत्वम् । उष्णत्वम् । विण्मूत्रदोषमदनाशित्वम् । दृष्टिप्रसादनत्वम् । रुचिप्रदत्वम् । अग्निदीप्तिकारित्वञ्च । इति राजनिर्घण्टः ॥ रूक्षत्वम् । कफवायुनाशित्वम् । पित्तकारित्वञ्च । तत्तैलगुणाः । कटुत्वम् । उष्णत्वम् । त्रिदोषकारित्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥ कृमियुक्तमलनाशित्वम् । तेजोबलकारित्वञ्च । धर्षणेनास्य गुणाः । त्रिदोषकारित्वम् । पुष्टिबलक्षयकण्डूकारित्वञ्च । इति राजनिर्घण्टः ॥ (कुसुम्भशाकभक्षणे निषेधमाह तिथितत्त्वधृतोशनोवचने यथा,—
"कुसुम्भं ललिताशाकं वृन्ताकं पूतिकां तथा ।
भक्षयन् पतितस्तु स्यादपि वेदान्तगो द्विजः" ॥)

कुसुम्भः, पुं, ("कुसेरुम्भोमेदेताः" । उणा° । ४ । १०६ । इति उम्भ प्रत्ययः ।) कमण्डलुः । इत्यमरः । ३ । ३ । १३६ ॥ (यथा, मनौ । ६ । ५२ ।
"क्लृप्तकेशनखश्मश्रुः पात्री दण्डी कुसुम्भवान्" ॥)
महारजनवृक्षः । इति राजनिर्घण्टः ॥ (कुसुम फुल इति भाषा ॥ अस्य पर्य्याया यथा ।
"पद्मोत्तमविकाशः स्यात् कुसुम्भः शरटस्तथा" ॥
इति वैद्यकरत्नमालायाम् ॥ अस्य गुणाश्च यथा ।
"कटुर्विपाके कटुकः कफघ्नो
विदाहिभावादहितः कुसुम्भः" ॥
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥)

कुसूः, पुं, (कुस् + कूप्रत्ययः ।) किञ्चुलुकः । इति हेमचन्द्रः ॥

कुसूलः, पुं, (कुस् + कूलच् । यद्वा कुशूलः निपातनात् सत्वम् ।) कुशूलः । इति कटशब्दार्थे भरतः ॥

कुसृतिः, स्त्री, (कुत्सिता सृतिः उपायः व्यवहारो वा ।) शाठ्यम् । इत्यमरः । १ । ७ । ३० । इन्द्रजालम् । इति हेमचन्द्रः । (कर्म्मधारये कुत्सितपथः । इति व्युत्पत्तिलब्धोऽर्थः ॥ कुत्सिता सृतिराचारो यस्येति विग्रहे, दुराचारे त्रि ।
यथा, भागवते ८ । २३ । ७ ।
"कस्मादयं कुसृतयः खलयोनयस्ते
दाक्षिण्यदृष्टिपदवीं भवतः प्रणीताः" ॥)

कुस्तुभः, पुं, (कुं भुवं स्तुभ्नोति । स्तुन्भ + मूलादित्वात् कः ।) विष्णुः । इत्यमरटीकायां भरतादयः ॥ (समुद्रः । तस्येदं अण् कौस्तुभम् इति शब्दार्थचिन्तामणिः ।

कुस्तुम्बरी, स्त्री, (कुत्सिता तुम्बरी । पृषोदरात् सुटि साधुः ।) धन्याकम् । इत्यमरटीकायां भरतः ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्यायः ।
"आर्द्रां कुस्तुम्बरीं कुर्य्यात् स्वादुसौगन्ध्यहृद्यताम् ।
सा शुष्का मधुरा पाके स्निग्धा तृड्दाहनाशनी" ॥)

कुस्तुम्बुरु, क्ली, (कुत्सितं तुम्बति अर्द्दयति यत् । तुबि अर्द्दने + बाहुलकात् उरुप्रत्ययः । जातिनिर्द्देशात् सुट् ।) धन्याकम् । इत्यमरः । २ । ९ । ३८ ॥ (अस्य पर्य्याया यथा, वैद्यकरत्नमालायाम् ॥
"धन्याकं धान्यकं धान्यं कुस्तुम्बुरु धनीयकम् ।
धन्या कुस्तुम्बुरी चान्या वेषणोया वितुन्नकम्" ॥)
(पुं, यक्षविशेषः । यथा, महाभारते । २ । १० । १५ ।
"कुस्तुम्बुरुः पिशाचश्च गजकर्णो विशालकः ।
एते चान्ये च बहवो यक्षाः शतसहस्रशः" ॥)

कुस्म क ङ मतीक्षिते । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट् ।) कुस्मिति च । (अत्र अकं) क्रुस्त्री दन्त्योपधः । मतीक्षितं बुद्धिपूर्ब्बकदर्शनम् । कुस्मित् कुत्सितमीषद्धास्यम् । क ङ, कुस्मयते जनः । बुद्ध्या पश्यति कुत्सितं स्मयते वेत्यर्थः । इति दुर्गादासः ॥

कुह त् क ङ विस्मापने । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-आत्मं-सकं-सेट् ।) क्रस्त्री । विस्मापनमन्यतो विस्मयोत्पादनम् । ङ कुहयते । कुहकेनेन्द्रजालिको लोकं विस्मापयति इत्यर्थः । स्यातां कुहयते विस्मापयते हेतुतो भयमिति भट्टमल्लदर्शनादिस्मापने इति पाठ इत्येके । इति दुर्गादासः ॥

कुह, व्य, ("वा ह च छन्दसि" । ५ । ३ । १३ ।